# वर्गचूलिका

णमोत्थु णं समणस्स भगवओ महावीरस्स
શ્રીપ્રેમ-ભુવનભાનુ-પદ્મ-જયઘોષસૂરિસદ્‌ગુરુભ્યો નમઃ

શ્રી ભુવનભાનુસૂરિ જન્મશતાબ્દીએ નવલું નજરાણું-૫૬

नवनिर्मित-वर्गोपनिषद्-वृत्तिविभूषिता

आगमसूत्ररूपा

# वर्गचूलिका

: मूलसंशोधनम्+नूतनसंस्कृतवृत्तिसर्जनम्+सम्पादनम् :


प.पू. प्राचीन आगम शास्त्रोद्धारक आचार्यदेव-श्रीमद्विजय**हेमचन्द्रसूरीश्वराणां** शिष्या
आचार्यविजय**कल्याणबोधिसूरीश्वराः**



: प्रकाशक :

श्री जिनशासन आराधना ट्रस्ट

- **મૂળ ગ્રંથ :** વર્ગચૂલિકા (વંગચૂલિયા / ઉવંગચૂલિયા / વંકચૂલિયા / શ્રુતહીલોત્પત્તિ/ સુયહીલણુપ્પત્તિ અધ્યયન)
- **નવનિર્મિત સંસ્કૃત વૃત્તિ :** વર્ગોપનિષદ્
- **૧૭ હસ્તાદર્શો દ્વારા મૂળગ્રંથ સંશોધન+નૂતનવૃત્તિસર્જન+સંપાદન :** પ્રાચીન આગમશાસ્ત્રોદ્ધારક પ.પૂ. આચાર્યદેવ શ્રીમદ્વિજય **હેમચન્દ્રસૂરીશ્વરજી મહારાજા** ના શિષ્ય પ.પૂ. આચાર્યદેવ શ્રીમદ્વિજય **કલ્યાણબોધિસૂરીશ્વરજી મહારાજ.**
- **વિષય :** શ્રુતકેવલીના મુખે શ્રમણ-શ્રુત અને જિનપ્રતિમાની આશાતનાના ફળનું કથન. ૬૩ ભવોની વૈરાગ્યદાયક કથા, અનેક ભાવિભાવોનું વર્ણન.
- **વિશેષતા :** પ્રાયઃ આજ સુધી અમુદ્રિત આગમસૂત્ર નવનિર્મિત વૃત્તિ સાથે પ્રથમ વાર પ્રકાશિત થઈ રહ્યું છે. આ સૂત્રની અન્ય કોઈ વૃત્તિ પ્રાપ્ત થતી નથી. વૈરાગ્યની વૃદ્ધિ માટે અને જિનપ્રતિમા આદિની ઉપાદેયતા જાણવા માટે પરિશીલનીય સૂત્ર.
- **પઠન-પાઠનના અધિકારી :** ગીતાર્થગુરુ અનુજ્ઞાત શ્રમણ ભગવંત.


- વિ. સં. ૨૦૬૬ • પ્રતિ : ૫૦૦ • આવૃત્તિ : પ્રથમ• મૂલ્ય : રૂા. ૧૩૦.

આ પુસ્તક જ્ઞાનદ્રવ્યથી પ્રકાશિત થયું છે. માટે ગૃહસ્થે મૂલ્ય ચૂકવીને માલિકી કરવી.

- **પ્રકાશક :** શ્રી જિનશાસન આરાધના ટ્રસ્ટ

E-mail : jinshasan_108@yahoo.com



© શ્રી જિનશાસન આરાધના ટ્રસ્ટ. આ પુસ્તકના કોઈપણ અંશનો ઉપયોગ કરતા પૂર્વે લેખક તથા પ્રકાશકની લેખિત મંજૂરી મેળવવી જરૂરી છે.

Copyright held by Shree Jinshasan Aradhana Trust under Indian Copyright Act, 1957. http://copyright.gov.in/documents/copyright rules 1957, pdf.

Note : Unauthorised usage, whether uploading on any website or printing in a book or forwarding to others on the internet or putting up on a blog is prohibited. Reproduction of this text by any means whether in part or in full, cannot be made unless express written consent obtained from shree Jinshasan Aradhana Trust. Any violation of this shall be deemed a violation of the intellectual rights of the publisher & of the copyright act, 1957.


---


**કંપોઝ-પ્રિન્ટીંગ-બાઈન્ડીંગ : ભરત ગ્રાફિક્સ,**

ન્યુ માર્કેટ, પાંજરાપોળ, રિલીફ રોડ, અમદાવાદ-૧.

Ph. : 079-22134176, M : 9925020106, E-mail : bharatgraphics1@gmail.com

चरमतीर्थपतिः करुणासागरः
श्रीमहावीरस्वामी





अनन्तलब्धिनिधानः
श्रीगौतमस्वामी

पञ्चमगणधरः
श्रीसुधर्मास्वामी



## કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ

**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ

**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ.પૂ. પંન્યાસપ્રવર

**શ્રી પદ્મવિજયજી ગણિવર્ય**

વૈરાગ્યદેશનાદક્ષ પ.પૂ. આચાર્યદેવ

**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

# સુકૃત સહયોગી

અનુમોદના... અભિનંદન... ધન્યવાદ... અનુમોદના... અભિનંદન... ધન્યવાદ...

## શ્રી અંધેરી ગુજરાતી જૈન સંઘ

## ઈર્લા બ્રીજ, મુંબઈ

**જ્ઞાનનિધિના સદ્વિનિયોગ બદલ**
**શ્રીસંઘ તથા ટ્રસ્ટીઓની**
**ભૂરિ ભૂરિ અનુમોદના**

**પ્રાપ્તિસ્થાન : શ્રી જિનશાસન આરાધના ટ્રસ્ટ**

**મુંબઈ :** શ્રી ચંદ્રકુમારભાઈ સી. જરીવાલા,
દુ.નં. ૬, બદ્રીકેશ્વર સોસાયટી,
મરીન ડ્રાઈવ 'ઈ' રોડ,
નેતાજી સુભાષ માર્ગ, મુંબઈ.
ફોન : ૨૨૮૧૮૩૯૦

શ્રી અક્ષયભાઈ જે. શાહ
૫૦૬, પદ્મએપાર્ટમેન્ટ,
જૈન દેરાસરની સામે, સર્વોદયનગર
મુલુંડ (વે.) મુંબઈ-૪૦૦૦૮૦.
ફોન : ૨૫૬૭૪૭૮૦

**પાટણ :** શ્રી ચંદ્રકાંતભાઈ એસ. સંઘવી
૬-બી, અશોકા કોમ્પલેક્ષ,
પહેલા રેલવે ગરનાળા પાસે, પાટણ,
ઉ.ગુ. ફોન : ૯૯૦૯૪ ૬૮૫૭૨

**અમદાવાદ :** શ્રી બાબુભાઈ સરેમલજી બેડાવાળા
સિદ્ધાચલ બંગલોઝ, સેન્ટ એન. સ્કુલ પાસે,
હીરા જૈન સોસાયટી, સાબરમતી,
અમદાવાદ-૫.
ફોન : ૨૭૫૦૫૭૨૦, ૨૨૧૩૨૫૪૩

## આગમની આશાતના નવિ કરીએ

નંદીસૂત્રમાં કહ્યું છે કે દ્વાદશાંગીની વિરાધના કરીને અનંત આત્માઓ સંસારમાં રખડ્યા છે અને અનંત આત્માઓ સંસારમાં રખડશે. આ વચનનું તાદૃશ દૃષ્ટાંત છે વર્ગચૂલિકા સૂત્ર. પ્રભુ વીરની પાંચમી પાટે થયેલા શ્રુતકેવલી આર્ય શ્રીયશોભદ્રસૂરિ મહારાજા પોતાના વિશિષ્ટ શ્રુતોપયોગ દ્વારા આ દૃષ્ટાંત કહે છે. પ્રભુ વીરના નિર્વાણથી ૯૮ વર્ષ પછીના કાળે આ દૃષ્ટાંતની ઘટનાનો પ્રારંભ થાય છે. શ્રમણદ્વેષથી શરૂ થયેલી વિરાધના અનેક ભવો સુધી ભયાનક દુઃખો આપે છે, એની ૬૩ ભવોની વક્તવ્યતા આ સૂત્રમાં સાક્ષાત્ રજુ કરવામાં આવી છે.

આજ સુધી સાંભળ્યું હતું કે સ્ત્રીનું શરીર અશુચિમય છે, અનિત્ય છે. પણ આ સૂત્રનું અધ્યયન કર્યા બાદ એમ થાય છે કે સ્ત્રી-શરીર માત્ર અશુચિ અને અનિત્ય જ નથી, મહાભયાનક પણ છે. સ્ત્રી-શરીરના રાગીની ભવોભવ સુધી કેવી દુર્દશા થાય છે ! તેને કેવા અધમાધમ ભવો કરવા પડે છે ! એ જાણીને ખરેખર ધ્રુજારી છૂટી જાય છે.

શ્રમણની આશાતના, જિનપ્રતિમા-ચૈત્યની આશાતના અને શ્રુતની હીલના જીવને નરકમાં ઘસડી જાય છે, એ આ સૂત્રમાં સ્પષ્ટપણે બતાવવામાં આવ્યું છે. જેઓ જિનપ્રતિમાને આરાધ્ય માનતા નથી, તેમના માટે આ સૂત્ર એક 'રેડ સિગ્નલ' છે. ગીતાર્થ ગુરુગમથી તેઓ પણ આ સૂત્રના અર્થોનું શ્રવણ કરી સન્માર્ગે આવે, તો તેમનું અને બીજા અનેક જીવોનું અહિત થતું અટકી જાય.

શ્રુતકેવલી શ્રીયશોભદ્રસ્વામી ભવિષ્યવાણી દ્વારા સંપ્રતિ રાજા, ધૂમકેતુ ગ્રહનો દુષ્પ્રભાવ, સંઘ અને શ્રુતનો પુનઃ ઉદય આદિનું વર્ણન કરે છે, એ પણ મનનીય છે.

આજ સુધી ભૂગર્ભમાં રહેલું આ અદ્ભુત સૂત્ર પુનઃ પ્રકાશમાં આવે અને અધિકારી અધ્યેતા વર્ગ તેના પઠન-પાઠન દ્વારા સ્વ-પરનું કલ્યાણ કરે, તે માટે આ સૂત્ર પર નૂતનવૃત્તિ - વર્ગોપનિષદ્નું સર્જન કર્યું છે. કથાત્મક સૂત્રની ટીકામાં પ્રતિપદ વ્યાખ્યાની આવશ્યકતા હોતી નથી. આથી જ તેવી ટીકાનું કદ નાનું હોય છે. જેમ કે નિરયાવલિકા (પાંચ ઉપાંગ) સૂત્ર ૧૧૦૦ શ્લોક પ્રમાણ છે, જ્યારે તેની ટીકા માત્ર ૬૦૦ શ્લોક પ્રમાણ છે. અનુત્તરોપપાતિકદશા સૂત્ર ૧૯૨ શ્લોક પ્રમાણ છે, તેની ટીકા માત્ર ૧૦૦ શ્લોક પ્રમાણ છે. અંતકૃતદશા સૂત્ર ૯૦૦ શ્લોક પ્રમાણ છે, જ્યારે એની ટીકા માત્ર ૪૦૦ શ્લોક પ્રમાણ છે.

એ જ રીતે પ્રસ્તુત સૂત્રની ટીકા પણ નાની છે. હા, જે અધ્યેતાઓને પ્રાકૃત-અર્ધમાગધી ભાષા પર પ્રભુત્વ નથી, તેમના માટે સંસ્કૃત છાયા આપેલી છે. તેથી જે અંશની વ્યાખ્યા નથી કરી, તે અંશ પણ તેમને સુગમ થઈ શકશે.

વ્યવહાર સૂત્ર (ઉદ્દેશક-૧૦, સૂત્ર-૨૭૫)માં કહ્યું છે કે જે શ્રમણ નિર્ગ્રંથને ૧૧ વર્ષનો ચારિત્ર પર્યાય થયો હોય, તેને વંગચૂલિકા ઉદ્દેશવી કલ્પે, અર્થાત્ ૧૧ વર્ષના પર્યાયવાળા શ્રમણ ભગવંત આ સૂત્રના યોગોદ્વહન કરવાના અધિકારી છે અને તેઓ જ યોગોદ્વહનપૂર્વક આ સૂત્રને ભણી શકે. વર્તમાનમાં આ સૂત્રના યોગોદ્વહનની પ્રવૃત્તિ નથી. છતાં પણ આ સૂત્રના પઠન-પાઠનના અધિકારી ગીતાર્થ ગુરુ દ્વારા અનુજ્ઞાત શ્રમણ ભગવંત જ છે.

પરમકૃપાળુ પરમાત્મા તથા પરમોપકારી ગુરુદેવશ્રી હેમચન્દ્રસૂરીશ્વરજી મહારાજાની કૃપાથી આ પ્રબંધ સંપન્ન થયો છે. સંશોધનમાં ઉપયુક્ત હસ્તાદર્શોનો પરિચય આગળ આપવામાં આવ્યો છે, તે સર્વ પ્રતોની સંરક્ષક સંસ્થાઓ શ્રી હેમચન્દ્રાચાર્ય જ્ઞાનમંદિર-પાટણ, શ્રી તપોવન સંસ્કાર ધામ-નવસારી, શ્રી લાલભાઈ દલપતભાઈ ભારતીય

સંસ્કૃતિ વિદ્યામંદિર - અમદાવાદ, શ્રી વિજયગચ્છનો જ્ઞાનભંડાર-રાધનપુર, શ્રીજયવિજય જ્ઞાનભંડાર-સિરોહી, શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર-કોબા, શ્રી ભાભાના પાડાનો ભંડાર-પાટણ, શ્રી દેવશાનો પાડો-વિમલગચ્છીય ઉપાશ્રયનો જ્ઞાનભંડાર-અમદાવાદ તથા ઓરિયેન્ટલ ઈન્સ્ટીટ્યુટ - વડોદરા શ્રી નેમિ-વિજ્ઞાન-કસ્તૂરસૂરિ જ્ઞાનમંદિર-સુરત, અને શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત - આ સર્વ સંસ્થાઓ ધન્યવાદને પાત્ર છે. આ સંસ્થાઓના સંચાલકોનો હું આભારી છું. વિશેષથી પ.પૂ. રાષ્ટ્રસંત આચાર્યદેવ શ્રીમદ્વિજય પદ્મસાગરસૂરીશ્વરજી મહારાજા, પ.પૂ. શાસન પ્રભાવક પંન્યાસપ્રવર શ્રી ચંદ્રશેખરવિજયજી ગણિવર્ય તથા પ.પૂ. શાસનપ્રભાવક આચાર્યદેવ શ્રીમદ્વિજય સોમચંદ્રસૂરીશ્વરજી મહારાજાના શિષ્યરત્નો બંધુબેલડી - પ.પૂ. મુનિરાજ શ્રી સુયશ-સુજશચંદ્રવિજયજી મ.સા.નું કૃતજ્ઞભાવે સ્મરણ કરું છું.

ભરત ગ્રાફિક્સ - શ્રી ભરતભાઈના પ્રયત્નોથી ટાઈપસેટીંગ આદિ કાર્ય કુશળતાપૂર્વક પાર પડ્યું છે.

આ સર્જન - સંશોધન - સંપાદન સ્વ-પર કલ્યાણનું નિમિત્ત બને એ જ એક શુભાભિલાષા સાથે... જિનાજ્ઞા વિરુદ્ધ લખાયું હોય તો મિચ્છામિ દુક્કડમ્, ક્ષતિનિર્દેશ કરવા માટે બહુશ્રુતોને નમ્ર પ્રાર્થના.

અષાઢ વદ ૧૦
વિ.સં. ૨૦૬૬
અઠવાલાઈન્સ, સુરત.

પ્રાચીન આગમ-શાસ્ત્રોદ્ધારક
પ.પૂ. આચાર્યદેવ શ્રીમદ્વિજય
હેમચન્દ્રસૂરીશ્વરજી મહારાજાનો
ચરણ સેવક
આચાર્ય વિજય કલ્યાણબોધિસૂરિ

શ્રીભુવનભાનુસૂરિ

100

જન્મ શતાબ્દી વર્ષ

યુગો સુધી ઝળહળશે ભુવનભાનુના અજવાળા ☆ જન્મશતાબ્દી વર્ષે ભાવભીની શ્રદ્ધાંજલિ ☆



વૈરાગ્યવારિધિ
તિતિક્ષામૂર્તિ
અધ્યાત્મયોગી
અપ્રમત્તસાધક
નિર્યામણાનિપુણ
ન્યાયવિશારદ
સંઘહિતચિંતક
વર્ધમાન તપોનિધિ
સુવિશાળ ગચ્છાધિપતિ
ગુરુકૃપાપાત્ર
સુવિશુદ્ધસંયમી
પ્રવચનપ્રભાવક
અનેકાંતદેશનાદક્ષ
શ્રેષ્ઠશ્રમણશિલ્પી
શિબિર આદ્યપ્રણેતા
બાળદીક્ષાસંરક્ષક
અપ્રતિમ પ્રભુભક્ત
અદ્ભુત ગુણાનુરાગી
નિર્દોષચર્યાચારી
સર્વતોમુખી પ્રતિભાસ્વામી

૧૯૬૭ — ૨૦૬૭

# અન્ય આગમોમાં વર્ગચૂલિકા સૂત્રનો નિર્દેશ

(१) से किं तं कालिअं ? कालिअं अणेगविहं पण्णत्तं, तं जहा - उत्तरज्झयणाइं......अंगचूलिया **वग्गचूलिया** विवाहचूलिया....

- नन्दीसूत्रे ॥१३७॥

(२) चूलिका नाम उक्तनुक्तार्थसङ्ग्रहात्मिका ग्रन्थपद्धतिः, तथा **वर्गचूलिकेति वर्गः** - अध्ययनानां समूहः, यथाऽन्त-कृद्दशास्वष्टौ वर्ग्गा इत्यादि, तेषां **चूलिका** ।

- नन्दीसूत्र ॥१३७॥ वृत्तौ,
स्थानाङ्गसूत्रे ॥१०-९७५॥ वृत्तौ, पाक्षिकसूत्रवृत्तौ

(३) संखेवितदसाणं दस अज्झयणा पण्णत्ता, तं जहा - खुड्डियाविमाणपविभत्ती... अंगचूलिया **वग्गचूलिया** विवाहचूलिया...

- स्थानाङ्गसूत्रे ॥१०-९७५॥

(४) नमो तेसिं खमासमणाणं जेहिं इमं वाइयं अंगबाहिरं कालियं भगवंतं, तं जहा - उत्तरज्झयणाइं.... अंगचूलियाए **वंगचूलियाए** विवाहचूलियाए....

- पाक्षिक सूत्रे

(५) एक्कारसवासपरियागस्स समणस्स निग्गंथस्स कप्पइ खुड्डियाविमाणपविभत्ति... अंगचूलिया **वंगचूलिया** विवाहचूलिया नामं अज्झयणमुद्दिसित्तए ।

**- व्यवहारसूत्रे ॥१०-२७५॥**

(६) एक्कारसवासस्स खड्डिया महल्ली विमाणपविभत्ती । कप्पइ य अंग**वंगे** विवाह चेव **चूलीओ** ॥ अंगाणमंगचूली महकप्पसुयस्स **वग्गचूलीओ** । विवाहचूलिया पुण पन्नत्तीए मुणेयव्वा ॥

**- व्यवहारभाष्ये ॥४६५५, ४६५६॥**

(७) सेसं उवंगचूलियातो गहेयव्वं, विज्जा - मंतप्पओगे तत्थेव संति ।

**- अङ्गचूलिकासूत्रे**

(અમુક હસ્તાદર્શોમાં છેલ્લે उवंगचूलिया सम्मत्ता એવો પણ પાઠ મળે છે. વંગચૂલિકા એ જ ઉવંગચૂલિકા કે અન્ય, એ બહુશ્રુતો માટે વિચારણીય છે. અંગોની ચૂલિકા = અંગચૂલિકા, એ રીતે ઉપાંગોની ચૂલિકા = ઉપાંગચૂલિકા એમકહીએ, તો અર્થસંગતિ થઈ શકે, પણ નંદીસૂત્રવૃત્તિમાં અધ્યયનોના વર્ગની ચૂલિકા - વર્ગચૂલિકા એવું જે કહ્યું છે તથા નંદીસૂત્ર આદિમાં वग्गचूलिया આવો જે પાઠ છે તેની સંગતિ ન થઈ શકે.)

# સંશોધનમાં ઉપયુક્ત હસ્તાદર્શોનો પરિચય

## क - શ્રી હેમચન્દ્રાચાર્ય જ્ઞાનમંદિર - પાટણ

**ડા. ૩૯૧, ગ્ર. ૧૮૬૬૨, પત્ર-૯**



પ્રથમ પત્ર



અંતિમ પત્ર

સ્તબક સહિત. આદિ - श्रीजिनेन्द्राय नमः ॥

भत्तिब्भरनमियसुरवर....

अन्त - जिणबयणे दढचित्तो होह पइहियहं । इति श्री-उवंगचूलिया सम्मत्ता सं. १९२९ फा. सु. १४ श्रीमद्विजय- चंद्रगणिना लिखिता।

---

**ख - श्री तपोवन संस्कार धाम- नवसारी**

**नं. २९, पत्र-१३**



પ્રથમ પત્ર



અંતિમ પત્ર

સ્તબક સહિત. આદિ - श्रीवितरागाय नमः । भत्ति-भरनमियसुरवर....

अन्त - जिणवयणे दढचित्तो होह पइहियहं ।९। इति श्रीवंगगचूलियाए सूयहीलुप्पत्ति अज्झयणं संपूर्ण । संवत् १८५८ वर्षे

फागुण वद १४ गुरुवासरे संपूर्णः । श्री- शांतलपुरनगरे । श्रीशांतिनाथप्रसादात्।

---

## ग - पं. देवसागरगणि लिखित श्री वंगचूलिया

### पत्र-११



પ્રથમ પત્ર



અંતિમ પત્ર

સ્તબક સહિત. આદિ - શ્રીવિતરાગાય નમઃ ॥

भत्तिब्भरनमियसुरवर...

અન્ત - ... जिणवयणे दढचित्तो होह पइहियहं ९ इति श्रीवंग्गचूलियाए सूयहीलुप्पत्ति अज्झयणं सम्मत्तं ॥ सकलपंडितश्री ७ पं । रत्नसागरगणि तत्शिष्य पं । देवसागरगणिलपीकृतं संवत् १८५६ ना वर्षे शाके १७२१ प्रवर्त्तमाने भाद्रवपदकृष्णपक्षे दसमतिथौ भौमवासरे ॥ यादृसं पुस्तकं दृष्ट्वा तादृसं लिखीतं मया यदि सूद्धमसूव्वा मम दोषो न दियतेः ॥१॥ इति श्री कल्याणमस्तुः मंगल्यंः ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ श्री ॥ लखीतं श्रीश्रेयांसप्रसादात् ॥ श्रीकारश्री ॥

---

**च - લાલભાઈ દલપતભાઈ ભારતીય સંસ્કૃતિ વિદ્યામંદિર**

**અમદાવાદ, નં. ૮૩૨, પત્ર-૮**



પ્રથમ પત્ર



नं.३.८३२ वंकचूलिया सत्तबक-८

અંતિમ પત્ર

સ્તબક સહિત. આદિ - भत्तिब्भरनमियसुरवर...

અન્ત- ....जिणवयणे दढचित्तो होइ पइहियहं ९ ॥ इति श्रीवंगंचुलियाए अज्झयणसमाप्त: ॥ छ॥

---

## छ - श्री विજયગચ્છનો જ્ઞાનભંડાર - રાધનપુર

પત્ર-૧૨



પ્રથમ પત્ર


यादृशंपुस्तकंदृष्ट्वा तादृशंलिखितंमया यदिशुद्धमशुद्धंवा ममदोषोनदीयते१ इतिशै
मितिसंवत१८५४वर्षेमाघशुदि७दिनेबुद्धवासरे श्रीसणवानगरेः श्रीकल्यांणमस्तुतिः॥
सकलपंडितचक्रचूडामणिपंडित्तोत्तमपंश्री११०पंश्रीरूपविजयगणि तत्सिष्यसकलस
द्धालपंडित।३।मुगटामणिपंश्री१०९पंश्रीमोहनविजयगणितत्सिष्यसकलपंडितप्रवरशि
रोमणिपंश्री१०७ पंश्रीमणिविजयगतत्सिष्यपंश्रीक्षिमाविजयगणिलिपिचक्रेतिः मंगलंति

## અંતિમ પત્ર

સ્તબક સહિત. આદિ - भत्तिब्भरनमियसुरवर...

અન્ત- ... जिणवयणे दढचित्तो होह पइदियहं ९ इयवग्गचूलियाए सुयहीलुप्पत्ति अज्झयणं समत्तः १ ॥ यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया यदि शुद्धमशुद्धं वा मम दोषो न दीयते १ इति शैमिति संवत् १८५४ वर्षे माघ शुदि ७ दिने बुद्धवासरे श्रीसणवानगरेः श्रीकल्यांणमस्तुतिः ॥ सकलपंडितचक्रचूडामणि पंडित्तोत्तमपंश्री ११० पं. श्री-रूपविजयगणि तत्सिष्य सकलसद्धालपंडित ।३। मुगटामणि पं.श्री १०९ श्रीमोहनविजयगणि तत्सिष्य सकलपंडितप्रवर-शिरोमणि पं श्री १०७ पं श्रीमणिविजयग तत्सिष्य पं. श्री क्षिमाविजयगणि लिपि चक्रेतिः मंगलंति

## જ - શ્રી જયવિજય જ્ઞાનભંડાર - સિરોહી

### પત્ર-૧૯



પ્રથમ પત્ર



અંતિમ પત્ર

સ્તબક સહિત. આદિ - ॐ नमः ॥ भत्तिब्भरनमिय-सुरवर... અન્ત -.... जिणवयणे दढचितो होहा पइदियहं ९ इय वंगचूलीयाए सूयहिलुपति अज्झयणसमत्तं ॥ श्लोक ॥ जादृष्टा लखीतं सास्त्रः तादृष्टा लखीतं मया मम शुधं अशुधं वा मम दोसो न दीयते ॥९॥ संवत् १८८३ना वर्षे मा वद ६ वारसनोनो संपूर्णः पं. श्री प अमीवीजेजी तत्सीष पायरजेणउ नेमीवीजे लपीकृतः ॥

## झ - શ્રી જયવિજય જ્ઞાન ભંડાર - સિરોહી

### પત્ર-૧૬



પ્રથમ પત્ર



અંતિમ પત્ર

સ્તબક સહતિ. આદિ - भत्तिब्भरनमियसुरवर... अन्त - जिणवयणे दढचितो होही पइदियहं ९ इय वंगचूलीयाइ सुयहीलुप्पत्तिअज्झयणं सम्मत्तं ॥ ॥ इति श्रीवंगचूलियासूत्रं समाप्तं ॥

इति श्रीउपांगचूलिकासूत्रं समाप्तं ॥ १८२५ वर्षे कार्त्तिककृष्ण अमावास्यां पूर्णतामगात् श्रीअर्बुदोपरि ऋद्धिप्रीयेण लिखितं ॥

## ट - श्री કૈલાસસાગરસૂરી જ્ઞાનમંદિર - કોબા

સા. ક્ર. ૨૭૨૬૭



પ્રથમ પત્ર



અંતિમ પત્ર

સ્તબક સહિત. આદિ - श्रीवीतरागाय नमः ।

भत्तिब्भरनमियसुरवर...

અન્ત- .... जिणवयणे दढचित्तो होह पइहियहं ।९। इति श्रीवंग्गचूलीया ॥ ॥ श्रीः ॥ सुयहीलणुप्पत्तिअज्झयण संपूर्णम् ॥ ॥श्रीः॥

---

**ઠ - શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર - કોબા**

**સા. ક્ર. ૧૦૦૬, પત્ર-૧૯**



પ્રથમ પત્ર



અંતિમ પત્ર

સ્તબક સહિત. આદિ - भत्तिब्भरनमियसुरवर...

અન્ત- जिणवयणे दढचितो होही पइदियहं ।९। इय वंगचूलीयाइ । सुयहीलुप्पत्तिअज्झयणं सम्मत्तं ॥ इति श्रीवंगचूलियासूत्तं समाप्तं ॥ वंगचूलिया तीरथ श्रीमारा राजना- अनुग्रथी लखीतं छइ दीवाली तीरथ श्रीमाराजनेवाव वाने अरथे लख्युं छे. बीजुं जे कोइ वाचे ते छइ दीवालीआसी- स वाचजो ।

---

**ड - ભાભાના પાડાનો ભંડાર - પાટણ**

**ડા-૧૩, ગ્રન્થ-૪૩૫, પત્ર-૫**



પ્રથમ પત્ર



અંતિમ પત્ર

માત્ર મૂળ. આદિ - भत्तिब्भरनमिरसुरनर...

અન્ત-... जिणवयणे दढचित्ता होह पइदियहं ॥८॥ इय वग्गचूलीयाए सुयहीलुप्पत्ती अज्झयणं सम्मत्तं ॥ इति श्रीवंगचूलीयाअज्झयणं समाप्तं

---

### ઢ - શ્રી હેમચન્દ્રાચાર્ય જ્ઞાનમંદિર પાટણ

### ડા. ૪૧૬, ગ્રન્થ-૨૦૬૧૯, પત્ર-૧૧



પ્રથમ પત્ર



અંતિમ પત્ર

સ્તબક સહિત. આદિ - भत्तिब्भरनमियसूरवर... અન્ત-... जिणवयणे दढचित्तो होह पइहियहं ९ इय वंगचूलियाए सूयहीलूप्पत्ति अज्झयणं समत्तः ॥१॥ संवत् १८५६ वर्षे मृगसिरशुदि ३ दिने श्रीगेडिनगरे श्रीवीरजीनप्रसात् श्रीरस्तु ॥

## ण - श्री हेमचंद्राचार्य ज्ञानमंदिर - पाटण

### डा-४२१, ग्रन्थ-२०९९३, पत्र-१०



अंतिम पत्र

स्तबक सहित. अन्त - जिणवयणे दढचित्तो होह पइदियहं ९ इय वग्गचूलियाए सुयहीलुप्पत्ति अज्झयणं सम्मत्तं ॥१॥ पं जीतसागर संवत १८४९ वर्षे वैशाख वदि ७ दीने श्रीपालितणानगरमध्ये इति मंगलं

---

## त - देवसानो पाडो विमळगच्छीय उपाश्रयनो ज्ञानभंडार

### अमदावाद, डा-१२८, ग्रन्थ-४५१४, पत्र-६



प्रथम पत्र



અંતિમ પત્ર

માત્ર મૂળ. આદિ - ॐ नमः सिद्धं ॥ भत्तिब्भरन-मियसुरवर... અન્ત- जिणवयणे दढचित्ता होह पइदियहं ॥१॥ सुयहीलुप्पत्तीणामज्झयइणं सम्मत्तं ॥ श्रीवीरात् २९० वर्षे संप्रत्तिभूपतिः तत १६९९ वर्षे दुष्टवणिजः एवं १९९० वर्षे श्रीवीरात् धूमकेतुग्रहो लग्नः ३३३ वर्षाणि तश्य राशौ स्थिति २३२३ उदयो भावी इति ॥

---

**થ - દેવસાનો પાડો વિમલગચ્છીય ઉપાશ્રયનો જ્ઞાનભંડાર**

**અમદાવાદ, ડા-૧૪૩, ગ્રન્થ-૫૮૮૭, પત્ર-૧૪**



પ્રથમ પત્ર



અંતિમ પત્ર

સ્તબક સહિત. આદિ - श्रीजिनाय नमः ॥ भत्तिब्भरन-मीरसुरनर... અન્ત-... जिणवयणे दढचितो होह पईदियहं ८ इय वंगाचूलीयाए सुयहीलप्पती अज्झयणं सम्मत्तंः ॥श्री॥

---

## द - દેવસાનો પાડો વિમળગચ્છીય ઉપાશ્રયનો જ્ઞાનભંડાર

### અમદાવાદ, ડા-૬૦, ગ્રન્થ-૧૫૪૨, પત્ર-૧૪



પ્રથમ પત્ર



અંતિમ પત્ર

સ્તબક સહિત. આદિ - श्री चिंतामणिपार्श्वनाथाय नमः ॥ भत्तिब्भरनमियसुरनर... अन्त - ...जिणवयणे दढचित्तो होइ पइदियहं ९ ॥ इति वंगचूलिया अध्ययन समाप्तम् ॥ सं. १९४३ पोस वद ७ ॥ (આ પ્રતિમાં આની પછી અંગચૂલિયા સૂત્ર શરૂ થાય છે.)

---

## ધ- ઓરીયન્ટલ ઈન્સ્ટીટયૂટ - બરોડા

## એસીસી નં. ૧૩૫૩૦, પત્ર-૧૦



પ્રથમ પત્ર

સ્તબક સહિત. આદિ - श्री जिनय नमः ॥ भत्तिब्भरनमिरसुरनर...

## न - सेन्ट्रल लायब्रेरी - बरोडा

## એસીસી નં. ૨૯૧૫, પત્ર-૧૭



પ્રથમ પત્ર



અંતિમ પત્ર

સ્તબક સહિત. આદિ - श्रीवितरागाय नमः । भत्तिब्भरनमियसुरवर....

અન્ત - ...जिणवयणे दढचित्तो होह पइहियहं ९ इति श्रीवंगाचूलियाए सुयहीलुप्पत्ति अज्झयणं संपूर्णः संवत् १८८२ वर्षे चैत्र वीद ११ सामे संपूर्णं ॥ श्री॥ ॥ श्री॥

## શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત

### પો.નં. ૧૦, પ્રત નં. ૭૦, પત્ર-૯

### પ્રથમ પત્ર


॥र्द०॥श्रीजिनाय नमः॥
॥र्द०॥श्रीजिनाय नमः॥नमिरसुरनरसिरिसेहरकिरणरइयसस्सिरियं नमि
उं सिरिवीरस्स वुच्छसुयदिट्ठलवमुप्पत्तिं॥१॥ वीरात्तेबीसमे वरिसे सिरिसुहम्मसामिनि
व्वाणं तत्तो चुयालीसे सिद्धो जंबुचरमनाणी २ तत्तइक्कारसवरसेहिं पभवसूरीग
उतियसगवणे तेवीसाए सिज्जंभवो य तत्तो गउसगं ३ सिरिजसभद्दसंभूइ दिज
य सीसाइ वालज्झाणधरा पावठियायन्निऊणं तिसत्तसगुरूणो ४ अट्ठत्तइ बा
हत्तरिसो महियाए अग्गिदत्तनामेणं लच्छिगेहकाए सोवनिमंडियो तवचरई ५ इत्तो
दुविहद्धरिसा गोठिप्पामसमसंपरवसगा कामलयापरत्ता वियरंतिसयातइकाए ६
पाणितितंसाहू मइंधानिग्घिणाअइपावा अइतिरकसत्तहत्था धावंतिबहुयसमकाले

## શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત

### પો.નં. ૧૦, પ્રત નં. ૭૦, પત્ર-૯

### ઉપાન્ત્ય પત્ર


सह अम्हाणं किं च फलं इच्चाइ एविंपयपं कि मं गधुलफलं देणं ति। उद्धवि अमए धम्मा
एकठाणपराहिं दिकहु अहियं नियंगमइ विगाप्पियं सच्छंदबुद्धिमग्गा आइरकइस्सं
अग्गिदत्तो तेइवीसवालियगा पत्तंसावयंधम्मगा। ठएदं दरिसेणंमन्नेएगमविदस्स
स णमूद्रहेता संकप्पियंपरूपल्लवेमाणा असंखकालेजा वड्डत्तदबोहियत्ताए कम्मंपरि
संतित्ता तएणं अग्गिदत्ता समियरू विवस्स कयरसहीनणेणं समाणाणं निगंठाणं नो
नदए व अासक्कारो सम्माणेन विस्सई अईइस्कं धम्मपाजणेणं विस्सइ तएणं अग्गिद
त्ताइवीसबालियगाउ हाजावा परिहवंता पनरेसवासइं अह किंचि आणणूवीए च
उरंतनवनवईबासपरियागं पाउणित्ता सोलसणेगायं काहि परिसूयान्नमाणा अइस्सा
णे बगया कालमासे कालं किच्चा धम्माएउ उवीए पठमं पयथंयेमि। दशबाससहसठि इएने।

# શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત
## પો.નં. ૧૦, પ્રત નં. ૭૧, પત્ર-૯
### પ્રથમ પત્ર




# શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત
## પો.નં. ૧૦, પ્રત નં. ૭૧, પત્ર-૯

### અંતિમ પત્ર



## શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત
## પો.નં. ૪૦, પ્રત નં. ૧૯૭, પત્ર-૯
## પ્રથમ પત્ર



## શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત
## પો.નં. ૪૦, પ્રત નં. ૧૯૭, પત્ર-૯
## અંતિમ પત્ર



## શ્રી નેમિ-વિજ્ઞાન-કસ્તૂરસૂરિ જ્ઞાનભંડાર - સુરત

પત્ર-૯

### પ્રથમ પત્ર

वंगचूलिआ सुत्तम्- १

ॐ जिनाय नमः । भत्तिब्भरनमिरसुरनरसिरिसेहरकिरणरइयसस्सिरि-
यं नमिउं सिरिवीरपयं वुच्छंसुयं हिलणुप्पत्ति॥१॥वीराउ वीसमे वरिसे सिरि-
सुहम्मसामि निव्वाणं ततो चुयालेसे सिद्धा जम्बू चरमनाणी॥२॥ तओ इक्कारस-
वरिसेहिं पभव सुरिगओ तियसभवणं तेवीसाए सिज्जंभवो य ततो गओ स-
ग्गं॥३॥ जसभद्दगुरु ततो सीसो सिज्जंभवस्स समयन्नु विहरंतो य पत्तो साव-
त्थिकुट्ठगुज्जाणं॥४॥ सिरिभद्दबाहु संभूइ विजयसीसा दुवालसंगधरा वासहि-
या य निच्चं कुणंति सुस्सुसणं गुरुणो॥५॥ अह भद्दबाहुसीसो महिलाए अग्गि-
दत्तनामेणं लच्छिगे उज्जाणे पडिमाहिओ तवं चरइ॥५॥ इत्तो दुवीसपुरिसा गो-
हिला मज्जमंसपरवसगा कामलयाए रत्ता विचरंति सया तदुज्जाणे॥६॥ पासंति

## શ્રી નેમિ-વિજ્ઞાન-કસ્તૂરસૂરિ જ્ઞાનભંડાર - સુરત

પત્ર-૯

### ઉપાન્ત્ય પત્ર

यहीलणं महजहाउदओ मुक्खाओ वीरपहुणो दूसए हियएगनवइअहिएहिं
वरीसाइ संपइ नीवो जिणपडिमा होहि ततो सोलसएहिं नवनवइसंजुएहिं व-
रीसेहिं ते दुट्ठा वाणीयगा अवन्नइस्संति सुयमेयं तंमि समए अग्गिदत्ता संघ-
सुयजम्मरासीनक्खत्ते अडतीसइमो दुट्ठो गलिंगिस्सइ धूमकेउगहो तस्स ठिइ
तिन्निसया तीत्तीसा एगरासीवरीसाणं तम्मि य संघस्स सुयस्स उदओ पच्छा
एइय जसभद्दगुरुणं वयणं सोच्चा मुणीसुवेरग्गो पायाहीणं कुणंतो पुणो २
वंदए पाए आपुच्छिउण सुरी सुगुरु तहय भद्दबाहुसंभूयं संलेहणं पवन्नो ग-
१ ओग्गिदत्तो पढमकप्पे इयसुयहीलणुप्पायफलीफलं जाणिउण जसभद्दे जिण-
वयणे दढचित्तो होह पइदीयहं। इति वंगचूलिया सुत्तम् ।

## શ્રી નેમિ-વિજ્ઞાન-કસ્તૂરસૂરિ જ્ઞાનમંદિર - સુરત
### પત્ર-૧૦
### પ્રથમ પત્ર

ॐ जिनाय नमः । भत्तिभर नमिरसुरनर सिरिसेहर किरणरइयसस्सिरियं नमिउं –
सिरि वीर पयं षुच्छं सुय हिल्लणुप्पत्ति वीराउ वीसमे वरिसे सिरिसुइम्म सामिनिव्वाणं
ततो चुयालेसे सिध्दा जम्बू चरमनाणी तओ इक्कारसवरिसेइं प्पभव सुरिगओ तियसभ-
वणं तेवीसाए सिज्जंभवो य ततो गओ सग्गं ३ जसभद्द गुरु ततो सीसो सिज्जंभवस्स-
समयन्नु विहरंतो य पत्तो सावत्थिकुट्ठ गुज्जाणं ४ सिरिभद्द बाहु संभूइ विजयसीसादु-
वालसंगधरा वासद्विया य निच्चं कणंति सुस्सुसणं गुरुणो अह भद्द बाहु सीसो महि-
लाए अग्गि दत्तनामेणं लच्छिमे उज्जाणे पडिमाट्ठिओ तवं चरइ ५ इत्तो दुवीसपुरिसा
गोट्ठिला मज्जमंसपरवसगा कामलयाए रता विचरंति सया तदुज्जाणे ६ पासंति तं
साहु मंद धीनिग्घिणा अइपावा अइतिक्खसत्यहत्था धावंति पहाय समकालं ७ पडियाय

## શ્રી નેમિ-વિજ્ઞાન-કસ્તૂરસૂરિ જ્ઞાનમંદિર - સુરત
### પત્ર-૧૦
### અંતિમ પત્ર

२०
गनवइ अहिएहिं वरीसाइ संपइ नीवो जिणपडीमा रोहि ततो सोलसएहिं नवनवइ संजुएहिं -
वरी सेहिं ते दुट्ठा वाणीयगा अवन्नइस्संति सुयमेयं तंमि समए अग्गिदत्ता संघसुय जम्मरासी
नक्खत्ते अउ तीसइमो दुट्ठो गलिं गिस्सइ धूमकेउ गहो तस्स ढिइ तिन्नि सया तीत्तीसा एग रासी वरीसाणं
तम्मि य संघस्स सुयस्स उदओ पच्छा एइय जसभद्द गुरुणं वयणं सोच्चा मुणी सुवेरग्गो
पायाहीणं कुणंतो पुणो २ वंदए पाए आपुच्छिउण सुरी सुगुरु तहय भद्दबाहु संभुयं
संलेहणं पवन्नो गओग्गिदत्तो पढमकप्पे इयसुयहीलणुप्पाय फलीफलं जाणिउण जसभद्दे-
जिणवयणे दढ चित्तो होए पइदीयहं ॥इति वंगचूलियासुत्तम्॥ सूत्रमिदं

## શ્રી નેમિ-વિજ્ઞાન-કસ્તૂરસૂરિ જ્ઞાનમંદિર - સુરત
### પત્ર-૧૫, સસ્તબક
### પ્રથમ પત્ર



## શ્રી નેમિ-વિજ્ઞાન-કસ્તૂરસૂરિ જ્ઞાનમંદિર - સુરત
### પત્ર-૧૫, સસ્તબક
### અંતિમ પત્ર



## શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત
## પો.નં. ૨૬, પ્રત નં. ૧૦૧, પત્ર-૧૨
### પ્રથમ પત્ર




## શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત
## પો.નં. ૨૬, પ્રત નં. ૧૦૧, પત્ર-૧૨


### ઉપાન્ત્ય પત્ર



## શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત
## પો.નં. ૨૬, પ્રત નં. ૧૦૨, પત્ર-૧૫
### પ્રથમ પત્ર



## શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત
## પો.નં. ૨૬, પ્રત નં. ૧૦૨, પત્ર-૧૫
### ઉપાન્ત્ય પત્ર



## શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત
## પો.નં. ૨૬, પ્રત નં. ૧૦૩, પત્ર-૧૪
## પ્રથમ પત્ર




## શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત
## પો.નં. ૨૬, પ્રત નં. ૧૦૩, પત્ર-૧૪

## ઉપાન્ત્ય પત્ર



## શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત
## પો.નં. ૨૬, પ્રત નં. ૧૦૪, પત્ર-૧૩
### પ્રથમ પત્ર


॥६०॥ नन्तिजरनमिस्स ॥ सिरिसेहरकिरणरंजियसस्सिरियं॥ तं मिनुसिरिवीरपयं
सुहंकयद्दीलप्पति ॥१॥ वीराठवीसमेवरिसे॥ सिरिसुहम्मसामिनिव्वाणं॥ तत्तो चुयालीसे सिद्धो
जंबु ॥ चरीमनाणी॥२॥ तत्तो इक्कारसवरिसोहे॥ पन्नसरीगंनुतियस्सनवणं॥ तेवीसाए सिद्धो
नवोयतत्तोगनुणं ॥३॥ जसनद्दगुरु तत्तो॥ सीसो सिद्धो नवस्ससमयन्नु॥ विहरंतो पत्तो
सावच्छिकुदयगुज्जाणं ॥४॥ सिरिनद्दबाहुसंनुई॥ विक्कायसीसाडुवालसंगधरा॥ पासहियाय
निव्वं ॥ कुणंतिसस्सणगुरुणो॥५॥ अह नद्दबाहुसीसो॥ महिलाइ अग्गिदत्तीनामेणं॥ तं ॥१॥

## શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત
## પો.નં. ૨૬, પ્રત નં. ૧૦૪, પત્ર-૧૩
### ઉપાન્ત્ય પત્ર


हारत्तो सोलसहदिनवइ २ सहदिवरीसेहहिं॥ तेडु ठावाणियगा॥ अवमतइसंति
सयमेयं ४ तंमिसमण अग्गिदत्ता संघस्सयराशिनरक्खे॥ अहतीसइमो इठो
लगिस्सईधुमकेनुगहो ५ तस्सठिइतिनिसया तीत्तीसाए गए शिवरिसाणं तंमिय
मीणपइठो संघस्ससयस्सउदयअठि ६॥ इयजसनद्दगुरुणं वयणं सोवा मुणी ४७०
सवेरागोपायाहिणं कुणंति॥ वुठो २ वंदणपाए ७ आपूठि नुणस्सरी सगुरुतहनद्द ६८ ५० | २२ २०
बाहुसंनुयं लसंलेहणपवनो गत्तोगिदत्तोपढमकप्पे ॥८॥ इयसयद्दीलणुपा

## શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત
## પો.નં. ૨૬, પ્રત નં. ૧૦૬, પત્ર-૮, સસ્તબક
### પ્રથમ પત્ર



## શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત
## પો.નં. ૨૬, પ્રત નં. ૧૦૬, પત્ર-૮, સસ્તબક
### અંતિમ પત્ર



## શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત
## પો.નં. ૨૬, પ્રત નં. ૧૦૭, પત્ર-૭, સસ્તબક
### પ્રથમ પત્ર



## શ્રી મોહનલાલજી જૈન જ્ઞાનભંડાર - સુરત
## પો.નં. ૨૬, પ્રત નં. ૧૦૭, પત્ર-૭, સસ્તબક
### અંતિમ પત્ર



अथ वर्गोपनिषद्वृत्तिविभूषितं

# वर्गचूलिकासूत्रम्

श्रीवर्द्धमानं जिनवर्द्धमानं, सूरीन्द्रमेवं गुरुहेमचन्द्रम् ।
प्रणम्य नम्यं वितनोमि वृत्तिं, श्रीवर्गचूलाभिध आगमेऽस्मिन् ॥

इह हि परमकारुणिकः सूत्रकारः प्रथमं मङ्गलमभिधेयं चाऽऽह–

**भत्तिब्भरनमियसुरवरसिर[1]सेहरकिरणरईयसस्सिरियं ।**
**नमिउं सिरिवीरपयं वुच्छं सुयहील[2]गुप्पत्ति ॥१॥**

**भक्तिः**– त्रैलोक्योत्कृष्टपात्रमिदं महाभाग्यसम्भारतोऽस्माभिरुपास्यत्वेनावाप्तमित्याद्याकारात्यन्तपूज्यबुद्धिः, तस्या भर इव **भरः**, नतिसम्पादकत्वसाधर्म्यात्, तेन **नताश्चैते सुरवराः** – श्रेष्ठनिर्जराः, तेषां **शिरसां शेखराः** – मालाः – **भक्तिभरनतसुरवरशिरःशेखराः**, तेषां **किरणाः**–तेजांसि, तैः **सश्रीकम्** – शोभासहितम्, **श्रीवीरपदम्** – अगण्यकारुण्यपुण्यश्रमणभगवच्छ्रीमहावीरचरणकमलम्, **नत्वा** – भक्तिप्रणामेन प्रणिपत्य, **श्रुतहीलकोत्पत्तिम्** – भगवदभिहितश्रुतापभ्राजनाकारिणामुद्भवम्, तत्प्राञ्जन्मादिकथनपुरस्सरम्, **वक्ष्ये** – कथयिष्यामि ॥१॥ प्रतिज्ञातमेव निर्वाहयति –

---

१. ख.ग.च.छ. – सिरिसे० । २. झ–हीलुप्पत्ति । ध – हीलग्गुपति ।

**वीराओ वीसमे वरिसे सिरिसुहम्म[1]सामिनिव्वाणं ।**
**तत्तो चुयालिसे सिद्धो जंबु चरिमनाणी ॥२॥**

**वीरात्** - परिनिर्वृतात् सतो **विंशतितमे वर्षे श्रीसुधर्म्मस्वामिनः** पञ्चमगणभृतो **निर्वाणं** बभूव, तथा चोक्तम् - आत्तं पञ्चाशदब्देन सुधर्मस्वामिना व्रतम् । त्रिशदब्दीमथाकारि शुश्रूषा चरमार्हतः ॥ मोक्षं गते महावीरे सुधर्मा गणभृद्वरः । छद्मस्थो द्वादशाब्दानि तस्थौ तीर्थं प्रवर्त्तयन् ॥ ततश्च द्वानवत्यब्दीप्रान्ते सम्प्राप्तकेवलः । आष्टाब्दीं विजहारोर्वीं भव्यसत्त्वान् प्रबोधयन् ॥ प्राप्ते निर्वाणसमये पूर्णवर्षशतायुषा । सुधर्मस्वामिनाऽस्थापि जम्बूस्वामी गणाधिपः - इति **(परिशिष्टपर्वणि ४ / ५६-५९)** ।

**ततः** - श्रीसुधर्मस्वामिनिर्वाणादनन्तरं **चत्वारिंशत्तमे** वत्सरे **चरमज्ञानी** - भरतक्षेत्रेऽन्तिमः केवलज्ञानी, **जम्बूः** - काश्यपगोत्रीयः श्रीजम्बूस्वामी, **सिद्धः** - मोक्षङ्गतः, श्रीवीरनिर्वाणाच्चतुःषष्टितमे संवत्सरे परिनिर्वृत इत्यर्थः, उक्तञ्च-बारसवरिसेहिँ गोअमो सिद्धो वीराओ वीसहिं सुहम्मो । चउसट्ठीए जम्बू - इति ॥२॥

---

१. ख.ग.च.छ - ०हम्मसा० । शेषेषु - ०हम्मासा०

**तओ इक्कारसवरिसेहिं[1] पभवसूरि गओ तियसभवणं[2] ।**
**तेविसाए सिज्जंभवो य तत्तो गओ सग्गं ॥३॥**

**ततोऽप्येकादशवर्षैः प्रभवसूरिः** – कात्यायनगोत्रीय-स्थविर आर्यप्रभवः, **त्रिदशभवनम्** – देवलोकं **गतः** । **ततश्च त्रयोविंशतितमे** वर्षे **शय्यम्भवः** – वत्सगोत्रीयस्थविर आर्यशय्यम्भवसूरिः, **स्वर्गं गतः** ॥३॥

**जसभद्दगुरु तत्तो सीसो सिज्जंभवस्स समयन्नू[3] ।**
**विहरंतो पत्तो सावत्थिकुट्ठगुज्जाणं ॥४॥**

**ततोऽपि शय्यंभवस्य शिष्यः समयज्ञः** – सम्पूर्ण-द्वादशाङ्गीसिद्धान्तवेत्ता, **यशोभद्रगुरुः** – तुङ्गीकाय-नगोत्रीयस्थविर आर्यश्रीयशोभद्रसूरिः, **विहरन्** – भगवद-भिहितविधिना संयमचर्यामनुपालयन्, **श्रावस्त्या** नगर्याः सत्कं **कोष्ठकं** नामो**द्यानं प्राप्तः**, ॥४॥ तत्र च –

**सिरिभद्दबाहुसंभूईविजयसीसा दुवालसंगधरा ।**
**पासट्ठिया य निच्चं कुणंति सुस्सूसणं गुरुणो ॥५॥**

**द्वादशांङ्गधरौ श्रीभद्रबाहुसम्भूतिविजय**नामानौ **शिष्यौ नित्यं च** – अनिशमपि, **पार्श्वस्थिताः** –

---

१. च – एक्का० । २. च – वनं । ३. क – समयविओ ।

अनत्यासन्नदूरभागे व्यवस्थिताः **गुरोः** श्रीयशोभद्रसूरेः, **शुश्रूषणम्** - पर्युपासनाम्, **कुर्वतः** - आयरिय - मग्गिमिवाहियग्गी सुस्सूसमाणो पडिजागरिज्जा (दशवैकालिके ९-३-१) - इत्यादिप्रवचनपरिणत्या विदधतः ॥६॥ अत्रान्तरे यदभवत्तदाह -

**अह भद्दबाहूसीसो मिहिलाए[1] अग्गिदत्तनामेणं[2] ।**
**लच्छिगे उज्जाणे[3] सो पडिमाई ठिओ तवं चरई ॥६॥**

**अथ मिथिलायां** नगर्याम्, **लक्ष्मके उद्याने भद्रबाहुशिष्यः अग्निदत्तनाम्ना** बभूव । **स च प्रतिमायाम्** - श्रमणाभिग्रहविशेषरूपायाम्, **स्थितः** - वर्तमानः प्रतिमाप्रतिपन्न उरीकृतप्रतिम इति यावत्, **तपश्चरति** - बाह्याभ्यन्तरतपसाऽऽत्मानं भावयति ॥६॥

मिथिलायामेव नगर्यां तस्मिन्नेवोद्यानेऽन्यदपि यदभवत्त-दाह-

**इत्तो दुवीसपुरिसा, गोट्ठिल्ला मज्ज-मंसपरवसगा[4] ।**
**कामलयाए[5] रत्ता वियरंति सया तदुज्जाणे ॥७॥**

**इतश्च गोष्ठी**-समानवयसां सभा, सा चेह प्रस्तावाद्विट-

---

१. ख.ग.च.छ-महि० । २. ग.च.छ - दत्तीना० । ३. च - ०ज्जाणं ।
४. ग.छ - ०सग्ग । ५. क - ०लयारत्ता ।

प्रायपुरुषसत्का गृह्यते, साऽस्त्येषामिति **गोष्ठीमन्तः**, तानेव विशेषयति - **मद्यमांसपरवशकाः** - मदिरापिशितव्यसनिनः, तानेव विशेषयति - **कामलतायां** गणिकायां **रक्ताः** अध्युपपन्नाः, के त इत्याह - **द्वाविंशतिपुरुषाः सदा तदुद्याने विचरन्ति**, तद्वेश्यासहितमिति गम्यते ॥७॥ ततश्चैवं विचरन्तस्ते

**पासंति तं साहुं[1] मद्दंधा निग्घिणा[2] अइपावा ।**
**अइतिक्खसत्थहत्था धावंति वहाय समकालं ॥८॥**

**मदान्धाः** - पीतमदिरासम्पादितमत्तत्वानुभावेन निर्नष्टविवेकलोचनाः **निर्घृणाः** - पूजनीयपात्रेऽप्यमर्षभृतत्वेनानुकम्पाशून्याः, अत **एवातिपापाः** - सङ्क्लिष्टसत्त्वाः, अनीदृशानां वक्ष्यमाणासमञ्जसकारित्वानुपपत्तेः, एवंविधाः **तं** अग्निदत्तनामानं **साधुं पश्यन्ति**, ततश्च तस्य **वधायातितीक्ष्ण-शस्त्रहस्तास्ते** पुरुषाः **समकालम्** - युगपत्, **धावन्ति**, क्वास्माकमत्र भोगभूमौ मुण्डपाषण्डिदर्शनं सञ्जातम् ? अतो व्यापादयाम एनमित्यभिप्रायतो वेगात्तदभिमुखं गच्छन्तीत्यर्थः ॥८॥ ततश्च

१. ख.ग - साहू । २. क - निग्घ० ।

**पडिया य अंधकूवे सव्वेऽदट्ठूण [१]मच्चूणा गहिया ।**
**[२]अन्नुन्न[३]सत्थपहया चिंतेइ मुणी [४]सकारणं ॥९॥**

ते **सर्वे**ऽपि मदान्धतया**ऽदृष्ट्वा**-गमनमार्गमनालोच्य, **अन्धकूपे** - अन्धकारमये गभीरतरेऽवटे, **च पतिताः**, तस्मिन्नपि, **अन्योऽन्यशस्त्रप्रहताः** - सङ्कटास्पदपतनेन मत्ततया च परस्परप्रहरणप्रहारविधुरितविग्रहाः, **मृत्युना गृहीताः** - कालधर्ममुपगताः ।

तदेतदृष्ट्वाऽग्निदत्तो **मुनिः सकारणं चिन्तयति**, दृष्टमसमञ्जसं तद्धेतुविमर्शपुरस्सरं विचारयतीत्यर्थः, **सकारुण्य**मिति पाठे प्रशमप्रकर्षतोऽपराधिष्वप्यनुकम्पा-सहितमित्यर्थः। ॥९॥ यच्चिन्तयति तदेवाह -

**हा हा अकालसमए वरायया जीवियाओ [५]वुच्छिन्ना ।**
**जिण[६]धम्मकरचित्ता कत्थवि पत्ता मुणई नाणी ॥१०॥**

**हा हा** इत्यत्यन्तखेदे, **जिनधर्मकरत्यक्ताः** - जिनकथितधर्मरूपहस्तावलम्बवर्जिता जिनधर्मतेजोविकला वा, क्तान्तपरनिपातः प्राकृतत्वात्, अत एव **वराककाः** -

---

१. ग - मच्छ० । २. क.च - अन्नुन्नं । छ - अन्नुन्नु । ३. च - सत्था । ४. ड.ध - सकारूणं । त - शकारुणो । ५. ग.च.छ - वुच्छे० । ६. त - धम्मखरचत्ता । ठ.द - धम्मकरचिंता ।

अत्यन्तं कृपास्पदानि, **अकालसमये** - यौवनस्थतया मरणस्यायोग्यकाले **जीविताद् व्युच्छिन्नाः** - मृतिमुपगताः । ते च परलोके **कुत्रापि प्राप्ताः** तिर्यगादिगतौ, तत् परमार्थतो **ज्ञानी** - अवध्याद्यतिशयज्ञानसम्पन्नः, विशिष्टश्रुतज्ञानालङ्कृतो वा, **जानाति** - स्वकीयज्ञानाऽऽलोके पश्यति, गत्यागतीनां चर्मचक्षुषामगोचरत्वात् ॥१०॥

**इय चिंतंतो[1] साहू पारित्ता काउसग्गं तओ चलिओ ।**
**जत्थेव य गुरुगुरुणो इरियाए समागओ तत्थ ॥११॥**

**इति** - अनन्तराभिहितम्, **चिन्तयन्** - विचारयन्, स **साधुः कायोत्सर्गं पारयित्वा ततः** स्थानात् **चलितः** । **यत्रैव च** स्थाने स्वकीयाः **गुरुगुरवः** गुरवश्च प्रगुरवश्चेत्यर्थः, सन्तीति गम्यते, **तत्रेर्यया** - इर्यासमितिपरिपालनपूर्वकम्, **समागतः** ॥११॥ ततश्च

**काउण य किईकम्मं[2] जसभद्दगुरूण भद्दबाहूस्स ।**
**संभूअविजयस्स वि तदा[3] पूरओ य कयंजलि पुच्छइ ।१२।**

**यशोभद्रगुरोर्भद्रबाहोः सम्भूतविजयस्यापि च कृतिकर्म** - वन्दनम्, **कृत्वा** - समयाभिहितविधिना विधाय,

---

१. ख.ग.च.छ - चिंतितो । २. क - कियक० । छ - किइक० । ३. ख.ग.च.छ. - तदो । ध - तहो ।

**तदा** - योग्यावसरे, तेषां गुरूणां **पुरतः** - समक्षम्, **कृताञ्जलिः** स मुनिः **पृच्छति** - स्वजिज्ञासां शब्ददेहमर्पयन् पर्यनुयुङ्क्ते ॥१२॥

**इत्थ पुच्छा - भयवं ! ते दुवीसगा गोट्ठिल्ल-पुरिसा अहम्मिआ अकालं कालधम्मेण पत्ता कहिं उववन्ना ? कत्थई वा जोणीमंडले कम्मणा परि-भामिज्जिसंति ? ते दुवीसगा किं सुलहबोहि-वत्तिणो उयाहु दुल्लहबोहिवत्तिणो त्ति ? पसीय मम संसयं विहाडेउं ।**

**अत्र पृच्छा - भगवन् ! ते द्वाविंशतिरधार्मिका गोष्ठीमन्तः पुरुषा अकालं कालधर्मेण** - मृत्युना परलोकं **प्राप्ताः**, ते **कुत्रोपपन्नाः** ?

प्रश्नान्तरमाह - ते च स्वकीयेनाशुभेन **कर्मणा कस्मिन् वा** पृथ्वीकायादिसत्के **योनिमण्डले** जीवोद्भवस्थानसमूहे, **परिभ्रमिष्यन्ति** ?

किञ्च **ते द्वाविंशतिः** पुरुषाः **किं सुलभबोधिवर्त्तिनः उतापि दुर्लभबोधिवर्त्तिनः** वा ? भवान्तरे सुप्राप-सम्यक्त्वास्तद्विपरीता वेत्याशयः, **इति** प्रश्नपरिसमाप्तौ ।

इत्यनन्तरोक्तं **मम संशयं विघटयितुं प्रसीद ।**

**तए णं से जसभद्दे गुरु तुंगियायणस्सगुत्ते तिन्नाणोवगए दिट्ठिवायंतभावियत्थकरणे सूओवओगं पउंजमाणे जेसिं दुवीसगोट्ठिल्लाणं पुरिसाणं गइं[1] उववायं कम्मेणं[2] जोणिमंडलपरिभमणबोहिदुल्लहं नाउण[3] तं अग्गिदत्तसीसं एवं वयासी ।**

**ततोऽनन्तरं तुङ्गीकायनगोत्रस्त्रिज्ञानोपगतः** मतिश्रुतावधिलक्षणज्ञानत्रयविभूषितः, द्वादशमाङ्गपर्यन्तोऽर्थस्तदनुरूपक्रिया च भाविता येन सः – **दृष्टिवादान्तभावितार्थकरणः**–सम्पूर्णद्वादशाङ्गीभावनाज्ञानपरिणतिसनाथः, **स यशोभद्रो गुरुः श्रुतोपयोगं प्रयुञ्जानः तेषां द्वाविंशतिगोष्ठीमतां पुरुषाणां गतिम्** – प्रेत्यभवम्, **उपपातम्** – पारलौकिकस्थानविशेषम्, **कर्मणा** – साधुप्रद्वेषोपार्जितसङ्क्लिष्टमोहनीयादिकर्मानुभावेन **योनिमण्डलपरिभ्रमणबोधिदुर्लभं च ज्ञात्वा**, भावप्रधानत्वान्निर्देशस्य बोधिदुर्लभतां विज्ञायेत्यर्थः, **तमग्निदत्तशिष्यमेवमवादीत्**। यदवादीत्तदेवाह–

१. च – गइ । २. ग.छ – ०म्मणे । ३. ख.ग.च.छ – ताउ० ।

अग्गिदत्ता ! ते गोट्ठिल्लपुरिसा तुमं वहयट्ठाए[1] पहावेमाणे मज्जपरवसगा[2] अंधकूवंमि पडिया समाणा परुप्परतिक्खसत्थेहिं छिन्नंगुवग्गा अट्टदुहट्ट-वसा पुण पुण कामलयगणियं कंखमाणा अंत-मुहूत्ताए तदज्झवसाएणं[3] तीसे णं कामलयाए गणियाए दाहिणत्थणबिंटपएसंमि स[4]कयनहक्खयंमि किमिजोणित्ताए[5] संक्कमिया[6] ।

**अग्निदत्त ! ते गोष्ठीमत्पुरुषास्तव वधाय प्रधाव-माना मद्यपरवशका अन्धकूपे पतिताः सन्तः परस्पर-तीक्ष्णशस्त्रैश्छिन्नाङ्गोपाङ्गाः**, आर्त्ताश्चैते दुःखार्त्ताः – **आर्त्तदुःखार्त्ताः** – मनसा देहेन च दुःखिताः **आर्त्तदुर्घटा** वा – आर्त्तनाम्नो ध्यानविशेषस्य दुःस्थगाः, ते च **वशाः**, विषयपरतन्त्राः, तथा **पुनः पुनः कामलतागणिकां काङ्क्षमाणाः, आन्तर्मौहूर्त्तिकेन तदध्यवसानेन** – काम-लतागणिका – काङ्क्षात्मकेनोपयोगेनोपयुक्ताः, ततश्च कालगताः, **णम्** – वाक्यालङ्कारे, **तस्याः कामलताया**

---

१. च – ०यट्ठयाए । २. ग – ०सग्ग । ३. ग.च.छ – साणं । ४ ख – सूकय । ड – सुकय । ५. छ – णियत्ता० । ग – ०णिवत्ता० । ६. ग.च.छ – संमिया ।

**गणिकाया दक्षिणस्तनवृन्तप्रदेशे स्वकृतनखक्षते** कृमीनां योनिर्येषां ते **कृमियोनयः** - कृमय एव, तद्भावेन - **कृमियोनितया सङ्क्रमिताः**, स्वकीयमत्यनुरूपगतिं प्राप्ता इत्यर्थः, यदुक्तम्-अन्ते या मति सा गतिः किल - इति।

ततोऽपि यदभवत्तदाह-

**तए णं अग्गिदत्ता ! तीसे णं कामलयाए गणियाए तेहिं गोट्ठिल्लपुरिसेहिं किमीजोणियत्ताए संकमियाहिं अउला दुरहियासा घणवेयणा पाउब्भूया ।**

**अग्निदत्त ! ततोऽनन्तरम्, णम्** - वाक्यालङ्कारे, **तस्याः कामलताया गणिकायाः कृमियोनिकत्वेन सङ्क्रान्तै-र्गोष्ठीमत्पुरुषैरतुला** - अन्यवेदनाभिरुपमातुम-शक्या, **दुरध्यासा** - अधिसोढुं दुःशक्या, **घनवेदना** - विपक्षलेशेनाप्यसंवलिता पीडा, **प्रादुर्भूता** - सञ्जाता । ततश्च -

**तीसे णं वेयणाए कामलया गणिया पीडिया समाणी अणेगाणं विज्जाणं चिकिच्छयाणं थणं उवदंसेमाणी[1] बहुमंत[2]-तंत-ओसह-भेसज्जेणं पडियारं**

१. च - ०दंसमा० । २. ग - मंनतंउस० ।

**करेमाणी संचिट्ठति ।**

**णम्** - वाक्यालङ्कारे, **तया वेदनया पीडिता सती कामलता गणिकाऽनेकानाम्**, भिषग्विद्यां सम्यग् विदन्तीति **वैद्याः**, तेषां **चिकित्सकानाम्**, अत्र वैद्यानामिति विशेषणेनार्धविदग्धादयः परिहृताः, **स्तनम्** - कृमिगृहीभूतमुरोजम्, **उपदर्शयन्ती** - चिकित्स्यतया प्रकटयती, **बहुमन्त्रतन्त्रौषधभैषज्यैः** तद्वेदनायाः **प्रतिकारं कुर्वाणा सन्तिष्ठति।** अत्र **मन्त्राः** - स्वचिकित्सानुगुणत्वेनाभिमताः प्रणवाद्यक्षरपङ्क्तयः, **तन्त्राणि**-रोगनिवारका विद्याविशेषाः, **औषधानि**-एकद्रव्यनिष्पन्नान्यगदानि, **भैषज्यानि** - अनेकद्रव्यनिष्पन्नान्यगदानि ।

**तया णं अग्गिदत्ता ! एगएणं विज्जे सत्थकम्मेण लद्धोवाए उरोयवियारणेणं ते दुवीसक्किमि[1]-कीडगा बेइंदिया[2] अट्ठि[3]-मंस-सोणियबद्धा साहरियजलभरियभायणे[4] पमुत्तूणं कामलयाए उवदंसेइ ।**

**अग्निदत्त ! णम्** - वाक्यालङ्कारे, **तदा शस्त्रकर्मणा**

---

१. ख.ग.च - किमि० । २. ख.ग - बैइं० । ३. ख.ग.च.छ - अट्ठिय० ।
४. ख.ग.छ - ०यणो ।

**लब्धोपायः**, एतद्वेदना शस्त्रकर्मोपशाम्येत्युपायज्ञः, **एकको वैद्यः, उरोजविदारणेन** - तथाविधशस्त्रप्रयोगतः स्तनविपाटनेन, **ते द्वाविंशतिकृमिकीटका द्वीन्द्रियाः, अस्थिमांस-शोणित-बद्धाः**, गणिकाशरीरसत्कास्थ्यादिसंवलिता इत्यर्थः, तान् **संहृतजलभृतभाजने प्रमुच्य** स वैद्यः **कामलताया** गणि-काया **उपदर्शयति** ।

**पुणोवि त्थणमंसं चम्मसंधिसुत्तेणं [1]मीलेइ । सं[2]रोहिणोसहेण समाहिं जणइ । तए णं अग्गिदत्ता ! सा कामलया तेहिं दुवीसकीडगेहिं त्थणमज्झकड्ढिएहिं [3]उप्पन्नसमाहिया [4]जाणियसुहा तं विज्जं विउलेणं असणपाणखाइमसाइमवत्थ-मल्लालंकारेण य जीवियारिहपीइदाणे[5]ण य पतोस-इत्ता विसज्जेइ ।**

**पुनरपि स्तनमांसं** - विपाटनेन विसंस्थुलावस्थावस्थितं वक्षोजपलम्, चर्ममयं सन्धिप्रयोजनं **सूत्रम्** - दवरकः - **चर्मसन्धिसूत्रम्**, तेन **मीलयति** - सम्यक् सन्दधाति,

१. ख.ग.च.छ - माले० । २. ख.ग.च - ०रोहणो० । ३. क.च - उवन्न० । ४. ख.ग - जयणिसुहा । त - जाणियसुहा । ५. ख.ग.छ - ०ण य तो० ।

ततोऽपि संरोहयति व्रणमिति **संरोहि**, तेनौषधेन **समाधिं जनयति** व्रणसंरोहणेन स्वास्थ्यमापादयतीत्यर्थः ।

**अग्निदत्त ! ततोऽनन्तरं सा कामलता** गणिका **स्तन-मध्यकृष्टैस्तैर्द्वाविंशतिकीटकैः**, सप्तम्यर्थे तृतीया, कृमीषु समाकृष्टेषु सत्स्वित्यर्थः, **उत्पन्नसमाधिका** - पीडोपशमेन सञ्जातस्वास्थ्या, अत एव **ज्ञातसुखा** - अनुभूतसुख-संवेदना, **तं वैद्यं विपुलेनाशनपानखादिमस्वादिमवस्त्र-माल्यालङ्कारैश्च जीवितार्हप्रीतिदानेन च प्रतोष्य** - सन्तोषप्रकर्षभाजनीकृत्य **विसर्जयति** ।

**तए णं सा कामलया गणिया तेसु क्किमी-किडगेसुं पुव्वबद्धाणुराया संकारुणं[1] चिंतेइ मा इमेसिं ववरोवणं मम हत्थाओ भविस्सइ[2] त्ति गहाय म(मि)हिलाए पुरीए [3]खाइयमज्झवडियद्ध सुक्क-सुणयकड्डुगंमि उम्मुयइ ।**

**ततोऽनन्तरं सा कामलता गणिका तेषु कृमिकीट-केषु पूर्वबद्धानुरागा** - प्राग्जन्मसत्कस्नेहप्रतिबद्धा सती

---

१. क - सकरु० । २. ख.ग - ०स्सइउ । ३. क.ख.ग.छ.ज.झ.ट.ठ.ड.ढ.ध.न - खाइयमज्झवडियद्ध । त - खाइयामज्झठियद्धं । थ - बाइमज्झवडियद्ध ।

**सकारुण्यम्** - अनुकम्पया सहितं यथा स्यात्तथा, **चिन्तयति - मैतेषां मम हस्ताद् व्यपरोपणं भविष्यतीति** विचार्य तान् कृमीन् **गृहीत्वा मिथिलायां पुर्यां खातिकामध्ये** - नगरनिर्धमने, पतितोऽर्धभागो यस्य तत् - **खातिकामध्य-स्थितार्धम्**, तस्मिन् **शुष्कशुनककोष्ठके** - अनेकदिन-पर्युषिततयाऽनार्द्रकु- क्कुरोदरे, **उन्मुञ्चति** - तदनाबाधाभिप्रायेण क्षिपति ।

**तत्थवि ते दुवीसकीडगा आयव-छुहा-तण्हाभि[१]-भूया समाणा अंतमुहुत्तपुहुत्तेहिं[२] कालगया ।**

**तत्रापि ते द्वाविंशतिकीटका आतपक्षुधातृष्णाभि-भूताः सन्तोऽन्तर्मुहूर्त्तपृथक्त्वैः कालगताः**, अन्तर्मुहूर्त्तद्वया-दारभ्यान्तर्मुहूर्त्तनवकाभ्यन्तरं मरणमुपगता इत्यर्थः ।

**तओ णं अग्गिदत्ता ! साहारणवणे समुच्छा-कंदएसु एगिंदियत्ताए उववज्जिस्संति । तओ कालेहिं खणिज्जमाणे कट्टिज्जमाणे[३] ते दुविस-किमीसत्ता पुढविदगागणि-पवण-वणस्सइसु[४] पंचसु एगिंदिएसु जहण्णमज्झिमगठिई पूरिस्संति ।**

---

१. ख.ग.छ - तण्हे० । २. क - त्तापहु० । ३. छ - रुट्टिज्ज० । ४. ख.ग.छ - एसु ।

**अग्निदत्त ! णम्** - वाक्यालङ्कारे **ततः साधारणवने** - साधारणवनस्पतिकाये **एकेन्द्रियतया समूच्छर्कन्दकेषु** - पर्वादिवपनमन्तरेणैव जायमानतया सम्मूर्च्छिमम्मूलजातिषु **उत्पत्स्यन्ते** ।

अत्रान्तर्मुहूर्तपृथक्त्वैः कालगताः सन्त एकेन्द्रियेषूत्पत्स्यन्त इत्यन्वयो बोध्यः, इत्थमेव भविष्यत्कालप्रयोगोपपत्तेरिति ।

**ततोऽपि कालैः** - कियताऽपि समयेन, वचनव्यत्यासः प्राकृतत्वात्, तथाविधमनुष्यादिभिः **खन्यमानाः कृष्यमाणाश्च ते द्वाविंशतिकृमिसत्त्वाः पृथ्वी-दकाग्नि-पवन - वनस्पतिषु पञ्चसु एकेन्द्रियेषु जघन्यमध्यमकस्थितिं पूरयिष्यन्ति** ।

**ततो वि य अग्गिदत्ता ! ताणं दुवीसक्किमिजीवाणं तीसे णं कामलयाए उयरंमि गंडोलयत्ताए उप्पत्ति भविस्सई । तओ चिगिच्छएणं दिन्नविरेएणं ते [1]दुवीसगंडोला अहिठाणदारेणं पुरिसलित्तंगाण पाडियाण अंतमुहु[2]त्तवि[3]वन्नाण तत्थेव पुरिसे उप्पत्ति भविस्सइ** ।

---

१. त - दुवीस अपाणदारए पु० । २. क - ०हुत्तं वि० । ३. - विवन्नगाणं ।

**ततोऽपि चाग्निदत्त ! तेषां द्वाविंशतिकृमिजीवानां तस्याः कामलताया उदरे गण्डोलतयोत्पत्तिर्भविष्यति ।**

अत्र गण्डोला उदरे जायमानाः कृमिविशेषाः । ततः, दत्तो विरेको मलशुद्ध्यौषधरूपो येन सः - **दत्तविरेकः**, तेन, **चिकित्सकेन** - वैद्येन, **ते द्वाविंशतिगण्डोला अधिष्ठानद्वारेण** - अपानेन, निष्काश्यन्ते, ततश्च **पुरीष-लिप्ताङ्गानाम्** - विष्टाऽऽविलविग्रहानाम्, **पातितानाम्** - उदरस्थानाच्व्यावितानाम्, **अन्तर्मुहूर्त्तात्** कालाद् **विपन्नानाम्** - कालधर्ममुपगतानाम्, **तत्रैव पुरीषे** - विष्टायाम्, **उत्पत्तिः** - जन्म, **भविष्यति** ।

**ततो वि अंतमुहुत्ताउएण ते दुवीसतेंदिया विवन्ना समाणा तम्मेव[1] पुरिसे चोरिंदिया[2] होहिंति । एवं च णं तीसे कामलयाए उच्चारपासवणखेल-ज्जल्ल-सिंघाण[3]-वंत-पित्तेसु सत्तवारं विगलिंदिय-त्तणं जहक्कमं पाविहिंति[4] । इत्थमेगुणतीसभव[5]-वत्तव्वया ।**

---

१. - तंमिवि । २. क - चौरिं० । ३. क - सिंहाणं । ४. क - पावहिं० ।
५. ड - इच्छइमेगुण । त - छम्मात्रोगूण ।

**ततोऽप्यन्तर्मुहूर्त्ताऽऽयुषा द्वाविंशतित्रीन्द्रिया विपन्नाः सन्तस्तस्मिन्नेव पुरीषे चतुरिन्द्रिया भविष्यन्ति ।**

**एवञ्च** - उक्तप्रकारेण, **णम्** - वाक्यालङ्कारे, **तस्या कामलताया उच्चारः** शकृत्, **प्रश्रवणम्** - मेहः, **श्लेष्मा** - कफः, **जल्ल** इति शरीरमलः, **शिङ्घाणः** - नासिकामलः, **वान्तम्** - वमनेनोद्गिलितो विकृताऽऽहारः, **पित्तम्** - मायुः, एतेषु **सप्तवारम्** - सप्तकृत्वः, **यथाक्रमम्** - उच्चाराद्याश्रयक्रमानुसारेण, **विकलेन्द्रियत्वम्** - द्वीन्द्रियत्रीन्द्रिय - चतुरिन्द्रियत्वम्, **प्राप्स्यन्ति** - स्वकर्मपरतन्त्रतया लप्स्यन्ते । **इत्थमेकोनत्रिंशद्भववक्तव्यता** कथिता ।

**तओ पुणो अग्गिदत्ता ! ते दुवीसगोट्ठिल्लपुरिसा तीसइमे[१] भवे *तीसे गणियाए गेहे सोए[२] गहनिद्धमणे मंडुका समुच्छिस्संति ।**

**अग्निदत्त ! ततः पुनस्ते द्वाविंशतिगोष्ठीमत्पुरुषास्त्रिशत्तमे भवे तस्याः** कामलताया **गणिकाया गेहे**-निवासे, **स्त्रोतसि** - अशुचिजलनिर्गमे, एतदेव स्फुटतरमाह - **गृहनिर्धमने** - क्षाले, खाल इति देशप्रसिद्धे, **मण्डूकाः सम्मूर्च्छिष्यन्ति,** सम्मूर्च्छिमदर्दूरत्वेनोत्पत्स्यन्त इत्यर्थः ।

---

१. ग-०समे । ★ एतच्चिह्नान्तर्गतः पाठः त-प्रतौ नास्ति । २. द - सोए गहनिद्धमणे । ड-सोयगहणनिद्धमणे ।

ततो दिणपुहूत्तेणं आउमइक्कम्म इगतीसइमे भवे* मूसियागब्भभवा[1] तीसे कामलयाए गणियाए गेहे होहिंति ।

ततोऽपि **दिनपृथक्त्वेन** - दिनद्वयादारभ्य दिननवकाभ्यन्तरम्, **आयुरतिक्रम्य** - स्वकीयभवस्थितिं पूरयित्वा, **एकत्रिंशत्तमे भवे मूषिकागर्भभवाः** - उन्दरीगर्भप्रसूताः **तस्याः कामलतायाः गणिकाया गेहे** मूषका **भविष्यन्ति**।

तओ य मासपुहुत्ता आउयखएणं दुतीसमे भवे तीसे णं कामलयाए गणियाए [2] गेहस्स य दारदेसंमि गत्तासूयरत्ताए अन्नाणाणुहवफलं[3] वेइस्संति ।

**ततश्च मासपृथक्त्वात्** - मासद्वयादारभ्य मासनवकादभ्यन्तरम्, **आयुःक्षयेण द्वात्रिंशत्तमे भवे तस्याः कामलतया गणिकाया गेहस्य च द्वारदेशे गर्त्ताशूकरतया अज्ञानानुभवफलं वेदयिष्यन्ति,** साधुप्रद्वेशरूपो यस्तीव्रदर्शन-

१. ख.ग-मुसपा० । २. ख-गिहेस्सावदा० । ३. ड-अन्नानाणुफलंनिवे० । त-अन्नाणाणुहवफलं वे० । थ - अन्नाणुहवफलंति वे० । द - अन्नाणुदव्वफलंति वे० ।

मोहोदयः, गणिकारिरंसातिशयरूपश्च यस्तीव्रचारित्रमोहोदयः, एतदुदयद्वयरूपो योऽज्ञानानुभवः, तस्य **फलम्** - विपाकः, **वेदयिष्यन्ति** - अनुभविष्यन्तीत्यर्थः ।

**तत्थ ते दुवीसगत्तासूयरा रुद्दा पयंडा पीणखंधा कामगिद्धा दाढाविलंबियवयणे कद्दमविद्धा विलित्तगत्ता तेणं चेवाहारवित्तिं[1] कप्पेमाणा परुप्पर[2] रुद्दसरेणं गुंजमाणा बहूणं पाणाणं[3] विमद्दणट्ठयाए अप्पाणं सहस्सिं मन्नमाणा वासपहुत्तठिईखएणं कालं किच्चा [4]सोलसरिगावच्चा तेत्तीसइमे[5] भवे अवंतिजणवएसु सोवागकुलेसु उवज्जिस्संति ।**

**तत्र ते द्वाविंशतिगर्त्ताशूकरा रुद्राः** - तीव्रक्रोधादिकषायकलुषिततया भयावहाकृतयः, अत एव **प्रचण्डाः** - अत्युग्रस्वरूपाः, **पीनस्कन्धाः** - समुपचितांसप्रदेशाः, **कामगृद्धाः** - आहारे स्त्र्यादिभोगे चात्यध्युपपन्नाः, **दाढाविलम्बितवदनाः**, तेषां तीक्ष्णदन्तास्तथा बहिस्तान्निर्गता वर्तन्ते, यथा तेषां वदनानि तदवलम्बितानीव प्रतिभासन्त इत्याशयः, तथा **कर्दमविद्धाः**, पङ्केनात्यन्तं खरण्टिततया

१. ख.ग.च-वत्ति । २. क-परप्प० । ३. त-प्रतौ-भूआणं जीवाणं सत्ताणं - इत्यधिकम् । ४. छ-सेल० । ५. च-०सएमे ।

तदनुविद्धा इवेत्यर्थः, तथा विष्टाद्यशुचिना **विलिप्तगात्राः** – अनुषक्तशरीरावयवाः, **तेनैव**-विष्टाद्यशुचिना, **आहारवृत्तिं कल्पयमानाः** – भोजनप्रयुक्तप्राणधारणं कुर्वाणाः, **परस्परम्** – मिथः **रुद्रस्वरेण** – श्रवणमात्रतोऽपि भयकारकेन शब्देन, **गुञ्जन्तः** – कोलाहलं विदधन्तः, **बहूनां प्राणानाम्** – एकेन्द्रियादिजीवानाम्, **विमर्दनार्थतया** – हिंसादिप्रयोजनत्वेन, **आत्मानं सहर्षम्** – प्रमोदसहितम्, **मन्यमानाः**, हिंसादि-प्रत्यला वयं जीवानां पीडामुत्पादयाम इत्यादि विचिन्त्य सन्तुष्टीभवन्त इति हृदयम्।

एवंविधास्ते **वर्षपृथक्त्वस्थितिक्षयेण कालं कृत्वा त्रयस्त्रिंशत्तमे भवेऽवन्तिजनपदेषु श्वपाककुलेषु श्वपाका-पत्या उत्पत्स्यन्ते**, चाण्डालसुतत्वेनोद्भविष्यन्तीत्यर्थः ।

**ततो णं ते दुवीस सोवागा वुड्ढिं पत्ता हुंड-संठाणा दीहदंता लंबोयरा [1] गुलियगवलरासिसन्निभा [2] अदंसणिज्जा जणाणं दुगंच्छं उप्पायमाणा सकम्मकुसला आवि होहिंति ।**

**ततोऽनन्तरं ते द्वाविंशतिश्वपाका वृद्धिं प्राप्ताः** सन्तो **हुण्डसंस्थानाः** – समयप्रसिद्धनिकृष्टाकारमन्तः, **दीर्घदन्ताः**

---

१. ख.ग.च.छ – गुलियरा० । २. ख.ग.च.छ – ०न्निकासा ।

– वैरूप्यप्रयोजकदाढादीर्घत्वदूषिताः, **लम्बोदराः** – बीभत्सतुन्दधराः, **गुलिताः** – मथिताः, **गवलाः** – महिषशृङ्गानि, बहिस्ताद्विच्छायत्वसम्भवान्मथितत्वेन छिन्नानां कान्त्यतिशयस्स्यादिति विशिष्टग्रहणम्, तेषां **राशिः** – प्रकरः, तस्य **सन्निभाः** – सदृशाः, अत्यन्तं कालवर्णोपेततया अमनोज्ञा इत्यर्थः, अत **एवादर्शनीयाः** – दर्शनमात्रतोऽप्यप्रीत्युत्पादकत्वेन तदयोग्याः, दृष्टमात्राश्च **जनानां जुगुप्सामुत्पादयन्तः**, एतेन तेषामतिशयकुत्सितत्वमावेदितम्, **स्वकर्मकुशलाश्चापि भविष्यन्ति**, अनेन तेषां कर्मतोऽपि चाण्डालत्वमावेदितम् ।

**तए णं ते दुवीसं[१]सोवागा कम्मकुसलत्तणेणं विण्णाणं[२]गुणेण य उवाहणाइकम्मउप्पायणेण बहु-अयरं दविणजायं एगओ मिलइस्संति । तं दव्वमाजीवियट्ठाए उवभुंजेमाणा विहरिस्संति ।**

**ततोऽनन्तरं ते द्वाविंशतिश्वपाकाः कर्मकुशलत्वेन विज्ञानगुणेन चोपनहादिकर्मोत्पादनेन** – चर्ममयपादुकादि-निर्मित्यनुष्ठानेन, **बहुकतरम्** – अतिप्रभूतम्, **द्रव्यजातम्** – पादुकादिविक्रयोपार्जितं धनम्, **एकतो मीलिष्यन्ति** – अमुकत्र स्थाने सञ्चयविषयीकरिष्यन्ति । **तद् द्रव्यमाजीविकार्थमुपभुञ्जाना विहरिष्यन्ति ।**

१. ख.ग.छ – ०सकसल० । २. ख – ०णं गुणे० ।

इत्थंतरंमि अग्गिदत्ता ! सा कामलया गणिया वुड्ढिपत्ता समाणी[1] बहूणं अत्थियाण य मग्गणाण य भिक्खायरियाण य अत्थं दावमाणी परिभाययमाणी नियय[2]सयणजणं आपुच्छित्ता परिव्वायगधम्मं पइ बद्धाणुराया महिलानगरीओ निग्गच्छइ, निगच्छइत्ता कासीजणवयमज्झट्ठियसुरसरीउवकंठठियाणं परिव्वायगाणं अंतिए आगम सोयमूलं परिव्वायगधम्मं उवसंपज्जित्ताण[3] विहर(रि)स्सइ[4]।

अग्निदत्त ! अत्रान्तरे सा कामलता गणिका वृद्धिं **प्राप्ता सती बहूनामर्थिकानां च** - वस्त्रादियाचकानाम्, **मार्गणानां च** - भोजनादिप्रयोजनानाम्, **भिक्षाचरिकानां च** - भिक्षुकानाम्, **अर्थम्** - तत्तत्प्रयोजनविषयीभूतं वस्तु, **दापयन्ती** - सेवकादिद्वारेणार्पयन्ती, **परिभाजयन्ती** - वितरणं कुर्वाणा, **निजकस्वजनजनम्** - ज्ञातिमित्रादिपरिवार-लोकम्, **आपृच्छ्य** - अनुज्ञाप्य, **परिव्राजकधर्मं प्रति बद्धानुरागा** सती **मिथिलानगरीतः** सकाशात् **निर्गच्छति**।

---

१. छ - समाणा । २. ख.च.छ - नियस० । ३. क - उवसंपत्ताणं । ४. द.ख.ढ.ड.झ.ट.ठ.न - विहरइ । थ - चीठइ । ध - चिट्ठइ। ज - विहरई ।

**निर्गम्य** च **काशीजनपदमध्यस्थितसुरसरिदुपकण्ठ-स्थितानाम्**, गङ्गातीराश्रयाणामित्यर्थः, **परिव्राजकानामन्तिके** - समीपे, **आगम्य शौचमूलं परिव्राजकधर्ममुपसम्पद्य** - स्वीकृत्य, **विहरिष्यति** ।

तए णं सा कामलया गणिया सुद्धपरिव्वा-यिया भविस्सई । अण्णया कयाइं[1] सा काम-परिव्वायिया कासीजणवयाओ बहिया सव्वतित्थाइं नमंसणट्ठयाए नियगुरुं आपुच्छित्ता बहिया जण-वयविहारं विहरमाणी तित्थाइं नमंसमाणी अवंती-देसट्ठियसिप्पासरितडेसु अणेगाहिं परिव्वायगाहिं सद्धिं संपरिवुडा धातुरत्तवत्थपवरपरिहिया तिदंड-कुंडि-अंकुस-अक्खमाल-पवित्तहत्था[2] समाणा[3] भमि-स्सइ ।

ततोऽनन्तरं सा कामलता गणिका शुद्धपरि-व्राजिका भविष्यति । अन्यदा कदाचित् सा काम-परिव्राजिका काशीजनपदाद् बहिस्तात् सर्वतीर्थानि

---

१. च - कयाए । २. ख.ग.च.छ - ०त्तयह० । ३. ग.च.छ - ०णा मिस्स० ।

**नमस्यनार्थम्** - नन्तुम्, **निजगुरुम्** - स्वकीयधर्माचार्यतया प्रतिपन्नं परिव्राजकम्, **आपृच्छ्य बहिस्तात् तीर्थाणि नमस्यन्ती अवन्तिदेशस्थितसिप्रासरित्तटेषु अनेकाभिः परिव्राज-काभिः सार्द्धं सम्परिवृता परिहितप्रवरधातु-रक्तवस्त्रा** - गैरिकोपरञ्जितश्रेष्ठाम्बरपरिधाना, **त्रिदण्ड-कुण्डी-अङ्कुश-अक्षमालापवित्रहस्ता सती भ्रमिष्यति।**

**तए णं सा कामलया परिव्वाइया सिप्पास-रितडेसु समागया[1] जाणित्ता अणेगे अवंतिजणवय-मज्झिल्ला सिट्ठिसेणावई[2]मंतिणो बहवे उत्तमा य [3]मज्झिमा य पुरिसा ईत्थीओ य जत्ताए हव्वमाग-मिस्संति ।**

**ततोऽनन्तरं सा कामलता परिव्राजिका सिप्रास-रित्तटेषु समागता** इति **ज्ञात्वाऽनेका अवन्तिजनपद-माध्यिकाः** - अवन्तिदेशान्तर्वासिनः **श्रेष्ठिसेनापतिमन्त्रिणः, बहव उत्तमाश्च मध्यमाश्च पुरुषाः स्त्रियश्च यात्रायाम्,** किलास्यां जङ्गमतीर्थभूतायां वयं पावनीभवाम इत्यभि-प्रायेणेत्याशयः **हव्वमिति** शीघ्र**मागमिष्यन्ति ।**

---

१. क.छ - गयं जा० । २. च - ०वई य मं० । ३. क - मद्धमा।

तत्थ णं ते दुवीससोवागा तीसे णं जत्ताए आगमिस्संति । तए णं कामलया परिव्वायिया तेसिं सिट्ठिं[१] जाव इत्थीणं[२] पुरओ सोयमूलं परिव्वायगधम्मं परूविस्सई-एवं खलु अम्हे सोयमूले धम्मे पन्नत्ते । से वि अ सोए दुविहे पन्नत्ते, तं जहा - दव्वसोए भावसोए अ, दव्वओ उदय-[३] मट्टियाए य भावओ दब्भेहि य मंतेहि य जण्णं अम्हं किमवि असुइ भवइ, सव्वं मट्टियाहिं लिंपइज्जइ । तओ सुहोदएणं पक्खालिज्जई । तते णं सो असुई सुई हवइ । एवं खलु सत्ता जलाभिसेयसत्ता परमपयं गच्छंति ।

तत्र ते द्वाविंशतिश्वपाकास्तस्या यात्रायामागमिष्यन्ति । ततोऽनन्तरं सा कामलता परिव्राजिका तेषां श्रेष्ठीनां यावत् स्त्रीणां पुरतः शौचमूलं परिव्राजकधर्मं प्ररूपयिष्यति । तद्यथा - **एवम्** - वक्ष्यमाणरीत्या, **खलुः** - वाक्यालङ्कारे, **अस्माकं शौचमूलो धर्मः प्रज्ञप्तः । तदपि च शौचं द्विविधं प्रज्ञप्तम्, तद्यथा - द्रव्यशौचं**

---

१. क - सड्ढि । २. क - इत्थीपु० । ३. त - उदएय ।

**भावशौचं च** । अत्र लिङ्गव्यत्ययः प्राकृतत्वात् । **द्रव्यत उदकमृत्तिकाभ्यां च भावतो दर्भैश्च मन्त्रैश्च । यदस्माकं किमप्यशुचि भवति,** तत् **सर्वं मृत्तिकाभिर्लिप्यते,** अस्माकमपावित्र्यं मृत्तिकादीषु सङ्क्रमतीत्याशयः ।

**ततश्च शुभोदकेन** - तीर्थादिपवित्रजलेन, शरीरं **प्रक्षाल्यते, ततोऽनन्तरं सोऽशुचि**रात्मा **शुचिर्भवति । एवं खलु सत्त्वा जलाभिषेकसक्ताः** - अनिशमपि जलशौचैकतत्पराः, **परमपदम्** - त्रैलोक्येऽपि श्रेष्ठं स्थानं मोक्षमिति यावत्, **गच्छन्ति** - शौचधर्मानुभावेन प्राप्नुवन्ति ।

**तया णं ते दुवीससोवागा कामलयापरिवाइयावुत्ता सोयधम्मं सोच्चा हट्ठतुट्ठा तं धम्मं अभिसद्दहमाणा रोयमाणा कामलयापरिव्वाइयाए तिपयाहिणपुव्वं[1] सोयमूलं धम्मं पडिवज्जिहंति[2] । पुणोवि कयप्पणामा सएसु गिहेसु पडिगमिस्संति । परिवायगधम्मपरमभत्ता होहिंति ।**

**तदा ते द्वाविंशतिश्वपाकाः कामलतापरिव्राजिकोक्ताः शौचधर्मं श्रुत्वा हृष्टतुष्टास्तं धर्ममभिश्रद्दधानाः** तत्करणे निजाभिलाषवन्त इत्यर्थः, **रोचमानाः** - अनन्यो -

१. क - ०याहण० । २. ख.ग.च.छ - ०वज्जिहं० ।

पादेयत्वेनोरीकृतवन्तः, **त्रिप्रदक्षिणापूर्वकं कामलता-परिव्राजिकायाः** पार्श्वे **शौचमूलं धर्म्मं प्रपत्स्यन्ते । पुनरपि** तस्यै **कृतप्रणामाः स्वकेषु गृहेषु प्रतिगमिष्यन्ति । परिव्राजकधर्मपरमभक्ताश्च भविष्यन्ति** ।

तदेतच्छौचमूलो धर्मो मिथ्या, मृत्तिकादेरेव स्वर्गादि-श्रेयोनिबन्धनत्वे कुम्भकारादेरपि तदवाप्तिप्रसङ्गात्, तथा चोक्तम् – जइ मट्टियाए सग्गो उदएण मीलियाइ संतीए । मन्नामि कुंभकारा सपुत्तदारा गया सग्गं – इति (**नानाचित्तप्रकरणे** ६४) । तदुक्तं परैरपि – मृत्तिकोदकसम्पर्काद्यदि शुध्यन्ति जन्तवः । कुलालः सकुटुम्बोऽपि तर्हि स्वर्गं गमिष्यति – इति (**स्कन्दपुराणे**) । न हि दुष्टभावो सर्वगङ्गापानीयादि-नापि विशुद्ध्यति, तत्तत्प्रक्षाल्यत्वविरहात्, उक्तञ्च – गङ्गातोयेन सर्वेण मृत्पिण्डैश्च नगोपमैः । अमृतैराचरन् शौचं दुष्टभावो न शुद्ध्यति – इति (**भागवते**) ।

तथापि दृष्टिरागग्रहगृहीतास्ते श्वपाका एनं धर्म्ममुरी-कृतवन्तः ।

